# संस्कृतवार्ता:

**दिनाङ्क :-09.08.2024** **प्रात: - 06:55**

**अथ वार्ता:**

**नीरज चोपड़ा**

राष्ट्रपति: द्रौपदी मुर्मू:, प्रधानमन्त्री नरेन्द्र मोदी च पेरिस् ओलम्पिक क्रीडायां रजत पदकं विजेतारं नीरज चोपरां अभिनन्दितवन्तौ। राष्ट्रपति मुर्मू: एकस्मिन् सामाजिक अन्तर्जाले पटले अवोचत् यत् भारतं तस्य विषये गौरवान्वित: अस्ति। सहैव स: सदैव यूनां कृते प्रेरणादायक: भविष्यति। स्वसन्देशे श्रीमोदी प्रोदीरितवान् यत् नीरज: स्वप्रतिभां मुहर्मुह: प्रदर्शितवान्। असौ अवोचत् यत् भारतं बहु प्रसन्नं अस्ति यतोहि स: क्रीडायां उत्तम्प्रदर्शनं अकरोत्।

**विदशेमन्त्री एस जयशंकर**

विदेशमन्त्री डॉ0 एस जयशंकर: अद्यारभ्य मालद्वीवस्य त्रिदिवसीय आधिकारिकयात्रायां भविष्यति। यात्राया: उद्देश्यं अस्ति द्वयो: देशयोर्मध्ये सुदृढं द्विपक्षीय-सम्बन्धवर्धनम्। अवधेयं यत् मालद्वीव: भारतस्य प्रमुख: समुद्रीय प्रतिवेशी वर्तते।

**प्रधानमन्त्रिण: – वायनाड्नगरं**

प्रधानमन्त्रिणः नरेन्द्रमोदिनः शनिवासरे भूस्खलनेन व्याकुलितं वायनाड्नगरं प्रति भ्रमणं निर्धारितमस्ति। प्रधानमन्त्रिणः कन्नूर्-वायनाड-नगरयोः भ्रमणार्थं सर्वाः व्यवस्थाः क्रियन्ते। यात्रायाः पूर्वम् कन्नूर्-वायनाड्-नगरयोः सुरक्षासमितय: अपि आयोजिताः। प्रधानमन्त्री वायनाड्-नगरस्य भूस्खलनेन प्रभावितस्य क्षेत्रस्य उदग्रविमानेन सर्वेक्षणं करिष्यति इति सम्भावना अस्ति। अत्रान्तरे, केरल-कर्नाटकयोः सेनाविभागेभ्यः आहूताः प्रायः पञ्चशतं सैनिकाः वायनाड्-नगरात् प्रत्यागन्तुं निश्चितवन्तः। नवनिर्मितं बैली-सेतुं सुदृढीकर्तुं दलमेकम् , उदग्र-विमानान्वेषण-दलम् च इतोऽपि कतिपयानि दिनानि यावत् वायनाड्-नगरे एव स्थास्यन्ति । अद्य अपराह्णे मण्डल-समाहर्ता-कार्यालये सशस्त्र-सेनाबलं स्नेहपूर्वकं गमनानुमतिं प्राप्तवत्। राज्य-मन्त्रिणौ पी. ए. मोहम्मद् रियास: , ए. के. ससीन्द्रन् च उपस्थितौ आस्ताम् । विगत-नवदिनानि यावत् प्रचलितस्य अन्वेषणस्य उद्धारकार्यस्य च कृते स्थानीयजनैः दत्तसमर्थनाय सेना-कर्मचारिणः कृतज्ञतां प्रकटितवन्तः।

-

**बाङ्ग्लादेश– प्रशासनम्**

बाङ्ग्लादेशे नोबेलपुरस्कारविजेतु: प्रोफेसर मुहम्मदयूनुसस्य नेतृत्वे अल्पावधिकरूपेण नियोजितं प्रशासनम् शपथवचनं स्वीकृतवान्। अनेन सहैव सेनाप्रमुख: जनरल-वकार-उज-जमां इत्येष: सूचितवान् यत् प्रायश: पञ्चदशजना: अपि अस्य अल्पावधिक- प्रशासनस्य परामर्शाय शपथवचनं स्वीकर्तुं शक्नुवन्ति। असौ, देशे त्रिषु चतुर्षु दिवसेषु स्थिति: सामान्या भविष्यति इति सम्भावनां प्रकटितवान्। अत्रान्तरे सेनया देशवासिन: निवेदिता: यत् केषाञ्चित् जनानां पार्श्वे यदि हिंसा-वध-पारस्परिक संघर्षाणां सञ्चेतना आगमिष्यति तदा पीडितजनै: निकटस्थे सैन्यशिविरे सम्पर्क: साधितव्य: इति।

**<u>परिस-ओलिम्पिक् हॉकी</u>**

ह्यपेरिस्-ओलम्पिक-क्रीडायां भारतीय-हॉकी-दलेन कांस्यपदकं विजितम् । ह्य: भारतदलेन स्पेनदलं द्वि एकं इत्यंकान्तरालेन पराजितम्।

राष्ट्रपतिः द्रौपदी मुर्मू: प्रधानमन्त्री नरेन्द्रमोदी च भारतीयहॉकीदलाय अभिनन्दनानि अयच्छताम्। राष्ट्रपतिना उक्तं यत् एष: विजयः भारतस्य कृते गौरवस्य विषयो वर्तते।

प्रधानमन्त्रिणा उक्तं यत् भारतीयहॉकीदलस्य सफलता तस्य कौशलस्य, दलभावनायाः च प्रतिबिम्बम् अस्ति। सः अवदत् यत् भारतीयानां हॉकी-क्रीडया सह भावनात्मकः सम्बन्धः अस्ति, एतत् पदकं देशस्य यूनां मध्ये हॉकी-क्रीडा अधिकं लोकप्रियतां प्राप्स्यति |

**<u>परिस-ओलम्पिक - मल्लयुद्ध</u>**

पेरिस् ओलम्पिक इति क्रीडाकुम्भे भारतीयः मल्लयोद्धा अमन-सेहरावतः अल्बानियादेशस्य जेलिम्खान् अबकारोवं पराजयित्य सप्तपंचाशत् किलोग्रामवर्गस्य फ्रीस्टाइल् इत्यस्य उपान्त्यचक्रीयक्रीडायां प्रवेशं कृतवान्। तस्य विजयेन भारतस्य मल्लयुद्धे पदकस्य आशा पुनः प्रज्वलिता, विशेषतः ह्यस्तनस्य विनेशफोगाटस्य हृदयविदारकप्रकरणानन्तरम्।

**।।इति वार्ता:।।**